International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 83-84
© 2019 IJSR
www.anantaajournal.com
Received: 25-03-2019
Accepted: 27-04-2019

**डॉ. सेवकराम शर्मा**
वशिष्ट शास्त्री, एमए ,बी एड, साहित्याचार्य, पीएचडी संस्कृतद्ध शास्त्री, राजकीय वरिष्ठ माध्यमिक पाठशाला करसोग जिला मण्डी, हिमाचल प्रदेश, भारत

**Correspondence**
**डॉ. सेवकराम शर्मा**
वशिष्ट शास्त्री, एमए ,बी एड, साहित्याचार्य, पीएचडी संस्कृतद्ध शास्त्री, राजकीय वरिष्ठ माध्यमिक पाठशाला करसोग जिला मण्डी, हिमाचल प्रदेश, भारत

# रसध्वने निरूपणं रुक्मिणीमङ्गलकाव्यगतरसध्वनेर्विवेचनम्

**डॉ. सेवकराम शर्मा**

**प्रस्तावना**

**वन्यालोकस्य व्याख्याकारेणाभिनवगुप्तेन ध्वनि शब्दस्य प०चाभिप्राया गृहीताः**

1. वाच्यः (ध्वतीति ध्वनिः)
2. वाचकः(ध्वनतीति ध्वनिः)
3. व्यङ्ग्यार्थः(ध्वन्यते इति ध्वनिः)
4. व्य०जना व्यापारः (ध्वन्यतेऽस्मिन्नीति ध्वनिः)
5. ध्वनिः काव्यम्। (ध्वन्यतेऽस्मिन्नीति ध्वनिः)

अत्र सर्वत्र व्य०जनामूलम्। प०चविधेषु ध्वनि शब्दार्थेषु काव्यरूपस्यार्थस्य लक्षणमेवं कृतं ध्वन्यालोके–

> “यत्रार्थः शब्दो तमर्थमुपसर्जनीकृत्स्वार्थो।
> व्यक्तः काव्यविषेषः स ध्वनिरिति सूरिभिः कथितःश।इति [1]

व्यङ्ग्यार्थरूपस्य ध्वनेर्भेदाः
ध्वनिषब्देनात्र मया व्यङ्ग्यार्थो गृह्यते।
व्यङ्ग्यार्थरूप ध्वनेः त्रयो भेदाः भवन्ति–
(क) वस्तुध्वनिः।
(ख) अलङ्कार ध्वनिः।
(ख) रसध्वनिः।

रसस्वरूपं प्रतिपादयनाचार्य मम्मटो वदति स्वीये काव्यप्रकाषे–

> “कारणान्यथ कार्याणि सहकारीणि यानि च।
> रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।
> विभावानुभावास्तत्कथ्यन्ते व्यभिचारिणः।
> व्यक्तः सः तैर्विभावाद्यैः स्थायी भावो रसो स्मृतः।।” [2]

लोके स्थायिरत्यादेः चित्तवृत्तिविषेषस्य यानि ललनादि जनककारणानि चन्द्रोदयादीनि परिपोषकाणि कारणानि;तथा रत्यादि भाव जन्यानि कायिकवाचिकमानसिकभाव विभक्तानि विविधानि काटाक्षा भुजोत्क्षेपादीनि सहकारीणि च यानि निर्वेदादीनि सन्ति तानि क्रमषः विभावानुभावव्यभिचारिण उच्यन्ते। तैरभिव्यक्तः सहृदयस्य स्थायी भावो रसः उच्यते। रसस्वरूप विषये चत्वारो वादाः ते यथा–

श्स्थायिनां विभावैः व्यभिचारिभिष्च संयोगाद्रसस्य निष्पत्तिः।”
इति भट्टलोल्लटस्य रसोत्पत्तिवादः।

“स्थायिनो विभावादिभिः संयोगात् अनुमाप्यानुमापकभावरूपात् सम्बन्धाद्रसस्य अनुमितिः।”
इति शङ्कुस्यनुमीतिवादः।

शविभावादिभिः संयोगात् भोज्यभोजकभावसम्बन्धात् रसस्य निष्पत्तिःश इति भट्टनायकस्य भुक्तिवादः।

श्स्थायीनां विभावादिभि व्यङ्यव्य०जकभावरूपात् सम्बन्धात्;संयोगात्द्ध रसस्यभिव्यक्तिः" इति अभिनवगुप्तस्याभिव्यक्तिवादः।

कविबालमुकुन्दभट्टविरचितस्य रुक्मिणीमङ्गलकाव्यस्यऽङ्गीरसः श्रृंगारः। अस्य विप्रलम्भरूपो भेदः प्रकामं व्य०जितः कविना। अन्ये वीर रौद्रादयो रसा अङ्गभूताः। श्रृंगारस्याऽङ्गित्वे कविना कृता रुक्मिणीकृष्णयोगान्धर्वविवाहस्य प्रतिज्ञा भूयस्यभिव्यक्ता। इदानीं रुक्मिणीमङ्गले रसाः लभ्यमाना प्रदर्श्यन्ते–

**श्रृंगारः**

प्रस्तुतकाव्ये संयोगापेक्षया विप्रलम्भ एव गरीयान् सहृदयहृदयहारिमर्मस्पर्षी चानुभूयते। काव्येऽस्मिन् व्यक्तो विप्रलम्भोऽयं मम्मटानुसारेणाभिलाषहेतुकः, विश्वनाथ मतेन पूर्वरागः दषरूपककाररीत्या च अयोग विप्रलम्भा इति लक्षयितुं शक्यते। यतोह्यत्र यः विप्रलम्भः परिपुष्टः सः रुक्मिणीकृष्णयोर्मिथः संयोगात्पूर्व एव।

सकृष्णषङ्खा मणिकृष्णभूषणा
मनोज्ञकृष्णास्तरणा सुकृष्णदृक्।
कृष्णान् पदार्थाननुरागसंयुता
विलोकयन्ती फलदर्पणादिकान्।।
श्रीकृष्णमेवानुरटन्त्यहर्निषम्
भैष्मीयथाचातक इष्ट वारिदम्।
सर्वेन्द्रियैः कृष्णपदाब्दसेवना
दात्मार्पणं सा हरयेऽकरोत् सती।।[3]

यत्र नायिकानायकयोर्मध्येगाढानुरागो भवति,पर०च परस्परं मेलनमषक्यं प्रतीयते तत्र विप्रलम्भ श्रृंङ्गारः भवति।

यथा– "यत्र तु रति प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ" [4]
यथात्र रुक्मिणी कृष्णयोरनुरागः परस्परः गाढः वर्तते। उभयोरपि परस्पर प्राप्तेरिच्छा वर्तते। पर०च परस्परमेलनं न सरलं तस्मादत्र विप्रलम्भस्याभिलाषः भेदः प्रतीयते, यतो हि पूर्वरागः। उभयोः दूरदेषे स्थितिरेवास्य कारणम्। अत्र प्रथमे पद्ये रुक्मिण्या अनुरागः प्रकटितो भवति यत् सा सर्वथा कृष्णपरा जाता यथा–श्मणिकृष्णभूषणाश्सानुरागसंयुक्ता सर्वेषुफलदर्पणादिषु पदार्थेषु श्रीकृष्णमेव पश्यन्ति। तथैव द्वितीये पद्येऽहर्निषं श्रीकृष्णस्य गुणाननुकीर्तयन्ती चातकवज्जाता,पुनश्च सा स्वस्य सर्वमपि श्रीकृष्णार्पणं कृतवती। अतोऽत्र विप्रलम्भश्रृङ्गारः वर्तते।

मन्दं मन्दं हि भैष्मी चलजलजपदो चाल्यत्यात्मभर्तः
कृष्णस्यानन्दमूर्तेः परमभगवतः प्राप्तिमन्वेषमाणा।
केषानुत्सार्य वामैररुणकररुहैरैक्षतापाङ्गतस्तान्।
भूपान् प्राप्तान् ह्रियासादित निजहरणायोद्यतं तं ददर्ष।।
दृष्ट्वानन्दघनं निजेषमनघं कृष्णं यदूनां पतिं
वेगातं प्रययौ सखीगणमरं त्यक्त्वाविदर्भेषजा।
गङ्गावज्जलधिं समुद्रतनया विष्णुं यथा पूरुषं
शक्तिः प्राणमिवेन्द्रियं गितिसुता शम्भुं तथा प्रेमतः।। [5]

अत्रोभयोः श्लोकयोः संयोगश्रृंगारः हृदयाह्लादकरः।अत्र रुक्मिण्याः श्रीकृष्णं प्रतिगमनं प्रदर्षितम्।
अत्र कृष्णमालम्बनम्, तदागमनमुद्दीपनम्, मन्द–मन्द चलनादि अनुभावः हर्षादि व्यभिचारी च । अतोऽत्र रुक्मिणीनिष्ठा रतिः प्रतीयमाना संयोगकालावच्छिन्नत्वेन संयोगश्रृंगारः। अत्र कृष्ण आलम्बनम्।

**हास्य**

**'वागादिवैकृतैश्चेतो विकासो हास इष्यते ञ** [6]
हास्यरसः हासप्रकृतिकः भवति रसस्यास्य स्थायीभावः हासो भवति। वाणीवेषादीनां विकृतिकारणात् यत्र चेतो विकासः भवति तत्र हास्यरसो भवति–
रुक्मिणीमङ्गलकाव्यगतोऽयं रसः।

यथा

हसन्त ऊचुर्यदवः परेषं
कृष्ण त्वयादत्तमहो सुरम्यम्।
श्यालायदेयं करपीडने स्वे,
कोऽपीदृषं वै नहि दातुमीषः।।[7]

अत्र रुक्मिण्याः भ्रातुदुरवस्थामवलोक्य बलरामस्य श्रीकृष्णं प्रत्युक्तिर्वर्तते यन्निज कर्मार्जितं फलमस्मै त्वया प्रदत्तम्। अतः स्वपाणिग्रहणकाले निजष्यालाय भवता यद् तत्तदभूतपूर्वमेव। एवमत्र रुक्मिणः वेषः विकृतिश्च हासोत्पादक वर्तते।

**करुणः**

'इष्टनाषादिभिश्चेतोवैक्लब्यं शोकषब्दभाक् [8]
यस्य कृते शोकः क्रियते स एवालम्बनं भवति। तस्यैव दुरवस्था कन्दनादिकम् अनुभावः,मोहव्याधि–प्रभृतिः व्यभिचारी विभावः। यथा–

रुक्मिण्याः परिभीविकम्पितत्तरस्तन्वातिषोकेन वै
संशुष्यन् मुखयावरुद्धगलया नेत्राम्बुपूर्णास्यया।
बैकलव्यस्खलिताग्ररक्तकनकामूल्यासृगा वत्सलः।
कृणस्तत्रगृहीत क०जचरणो घातान्निवृतोऽभवत्।। [9]

अत्र रुक्मिण्या चितव्याकुलता चित्रिता वर्तते। यतो हि निज भ्रातुः वधार्थमुद्यतं भगवन्तं वारयितुमस्या प्रार्थना सूचयति यत् यदि रुक्मी वधो भवति तर्हि स्वेष्टजन वियोगो भविष्यति– इति विचिन्त्यैव सा व्याकुलिताऽभवत्। अतोऽत्र रुक्मी एवालम्बनं तस्यावस्थायां या श्रीकृष्णहस्तेन वधकारणात् सम्भाविता तस्या चिन्तनमेवात्रोद्दीपनम् । अत्र भ्रातृमोहादि यो व्यभिचारी भावाः सन्ति। अतोऽत्र करुण रसस्य प्रतीतिर्भवति। यद्यप्यत्र वियोगो नोपस्थितः तथापि सम्भावितमृत्युकारणादत्र वियोगो भवितुमर्हति। तस्मादप्यत्र करुण एव रसः।
एवमत्र रसनिरूपण पूर्वकं रुक्मिणीमङ्गलकाव्यगतरसध्वनिविवेचने शृंगार–हास्य–करुणाः त्रयो रसाः प्रदर्षिताः।

**संदर्भ ग्रंथ सूची**


1. ध्वन्यालोक 1/13
2. काव्य प्रकाष
3. रु म 3/8,9
4. सा दर्पण/187
5. रु.म.महा.10/66,67
6. सा दर्पण 3/176
7. रु.म. महा. 12/21
8. सा दर्पण 3/177
9. रु मं महा. 12/16